ह्येणां हानवानां च धापच ॥१२॥ सावित्री त्वं च देवानां भूतमंत्र
गणेषु च ॥ अन्तर्वेदी च यज्ञानां ऋत्विजां चैव दक्षिणा ॥१३॥
सिद्धिस्त्वं मातृकाणां नु वेलां सागरस्य च ॥ पक्षीणां प्रथमा
पक्षीनागानां सुरसेति च ॥१४॥ कन्यानां ब्रह्मवर्चा त्वं सौ
भाग्यं प्रमदासु च ॥ ब्रह्मवादिन्यपो दीक्षा शोभा च परमा
तथा ॥१५॥ ज्योतिषां त्वं प्रभा देवि नक्षत्राणां च रोहिणी ॥
राजद्वारेषु तीर्थेषु नदीनां संगमेषु च ॥१६॥ पूर्णा च पूर्णिमा
चन्द्रे कृत्तिका सा इति स्मृता ॥ सरस्वती च वाल्मीके स्मृतिर्द्वै
पायने तथा ॥१७॥ कर्षकाणां च सीतेति भूतानां धारिणी तथा

णसस्त्वं महादेवी वनेषूपवनेषु च ॥६॥ सवरैर्वर्वरैश्चैव पुलिंदै
श्च सुपूजिता ॥ मयूरपक्षध्वजिनी लोकान्क्रमसि सर्वशः ॥७॥
कुक्कुटैश्छागलैर्मेषैस्सिंहव्याघ्रैस्समाकुला ॥ घंटानिनाद
बहुला विंध्यपर्वतवासिनी ॥८॥ त्रिशूलिनी पट्टिसी च सूर्य्यचं
द्रपताकिनी ॥ नवमी कृष्णपक्षस्य शुक्लस्यैकादशी तथा ॥
९॥ भगिनी बलदेवस्य रजनी कलहप्रिया ॥ आवासा सर्वभू
तानां निष्ठा च परमा गतिः ॥१०॥ नंदगोपसुता चैव देवानां
विजयावहा ॥ चीरवासा सुवासाश्च रात्रिः संध्या त्वमेव च ॥११
प्रकीर्णकेशी मृत्युश्च तथा मांसौदनप्रिया ॥ लक्ष्मीरलक्ष्मी

पार्वतीचत्वं पौराणीमृषयो विदुः॥ अतं धत्से कमर्देहेणां प्रजाप
तिवचोयथा॥२४॥ मेरोर्विवादशीलानां त्वमिंद्राणीतिवि
श्रुता॥ त्वयाव्याप्तमिदं सर्वं जगत्स्थावरजंगमम्॥२५
संग्रामेषु च सर्वेषु अग्निप्रज्वालितेषु च नदीतीरेषु चौरेषु
कान्तारेषु पवनेषु च॥२६॥ प्रवासे राजवंशेषु शत्रूणां
चैव मर्द्दने॥ प्राणात्यागेषु सर्वेषु त्वं हि रक्षा न संशयः॥२७॥
त्वं हि मे हृदये देवि त्वयि चित्तं मनस्त्वयि॥ रक्ष मां सर्वपापे
भ्यः प्रसादं च करिष्यसि॥२८॥ इमं चैव स्तवं देव्या विरिंचिना समप्र
कल्पितम्॥ यः पठेत्प्रातरुत्थाय शुचिस्तद्गतमानसः॥२९॥

ऋषीणां धर्म्मबुद्धिस्तु देवानां मानसी तथा ॥ १८ ॥ सुरा देवी च
भूतेषु स्तूयसे त्वं कर्म्मभिः ॥ इन्द्रस्य चारुदृष्टिस्त्वं सहस्रन
यनेति च ॥ १९ ॥ तापसानां च देवी त्वं सामिनी चाग्नि
होत्रिणाम् ॥ क्षुधा च सर्वभूतानां तृप्तिस्त्वं देवतेषु च ॥ २० ॥
स्वाहा तृप्तिर्धृतिर्मेधा वसूनां च वसुंधरा ॥ आशा त्वं मानु
षाणां तु तुष्टिश्च कृतकर्म्मणाम् ॥ २१ ॥ दिशश्च विदिशश्चैव
तथा ह्याग्निशिखाप्रभा ॥ शकुनी पूतना चापि रेवती च
सुदारुणा ॥ २२ ॥ निद्रा च सर्वभूतानां मोहिनी क्षत्रिया तथा
विद्यानां ब्रह्मविद्या त्वमोंकारो वषट् तथा ॥ २३ ॥ नारीणां

त्रिभिर्मासैस्तु सा देवी कांक्षितं वै प्रयच्छति ॥ सत्यं ब्रूत च
दैवज्ञैः दै[illegible]नवचो यथा ॥३०॥ लग्नां वंधं वधं चौरं पुत्र
नाशं धनक्षयम् ॥ भयं व्याधिश्च मन्त्रं च पूजिता समपि
ष्यति ॥३१॥ त्वां स्तोष्यन्ति ये भक्त्या स्तवेनानेन वै शुभे ॥ तस्याहं न
प्रणश्यामि स च मे न प्रणश्यति ॥३२॥ मोहयित्वा च तं कंसं ए
कात्वं भोक्ष्यसे जगत् ॥ अहमप्यात्मनो वृत्तिं विधास्ये गोषु गोप
वत् ॥३३॥ स्ववृद्ध्यर्थमहं चैव करिष्ये कंसगोपताम् ॥ एवं तां स
समादिश्य गतोऽन्तर्द्धानमीश्वरः ॥३४॥ सा चापि तं नमस्कृत्य तथास्ति
ति विनिश्चिता ॥३५॥ इति श्रीमहाभारते [illegible] भगवत ग

लि १ न २